# shrI subrahmaNyahRidaya stotraM

# શ્રીસુબ્રહ્મણ્યહૃદયસ્તોત્રમ્

## Document Information

Text title : shrii subrahmaNyahRidayastotram

File name : subrahridayastotra.itx

Category : hRidaya, subrahmanya

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : March 15, 2006, November 7, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 11, 2025

*sanskritdocuments.org*

shrI subrahmaNyahRidaya stotraM

# શ્રીસુબ્રહ્મણ્યહૃદયસ્તોત્રમ્

અસ્ય શ્રી સુબ્રહ્મણ્ય હૃદય સ્તોત્રમહામન્ત્રસ્ય,
પરબ્રહ્મ ઋષિઃ । દેવી ગાયત્રી છન્દઃ । શ્રીસુબ્રહ્મણ્યો દેવતા ।
સૌઃ બીજમ્ । પ્રીં શક્તિઃ । શ્રીસુબ્રહ્મણ્યેશ્વરઃ કીલકમ્ ।
શ્રી સુબ્રહ્મણ્યેશ્વરપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

॥ કરન્યાસઃ ॥

ૐ સુબ્રહ્મણ્યાય અઙ્ગુષ્ટાભ્યાં નમઃ ।
ષણ્મુખાય તર્જનીભ્યાં નમઃ ।
શક્તિધરાય મધ્યમાભ્યાં નમઃ ।
ષટ્ત્રિંશત્કોણાય અનામિકાભ્યાં નમઃ ।
સર્વતોમુખાય કનિષ્ઠિકાભ્યાં નમઃ ।
તારકાન્તકાય કરતલ કરપૃષ્ઠાભ્યાં નમઃ ॥

॥ હૃદયાદિ ન્યાસઃ ॥

ૐ સુબ્રહ્મણ્યાય હૃદયાય નમઃ ।
ષણ્મુખાય શિરસે સ્વાહા ।
શક્તિધરાય શિખાયૈ વષટ્ ।
ષટ્ત્રિંશત્કોણાય કવચાય હુમ્ ।
સર્વતોમુખાય અસ્ત્રાય ફટ્ ।
તારકાન્તકાય ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ॥

॥ ધ્યાનમ્ ॥

ધ્યાનમ્-
ષડ્વક્ત્રં શિખિવાહનં ત્રિનયનં ચિત્રામ્બરાલઙ્કૃતં
વજ્રં શક્તિમસિં ત્રિશૂલમભયં ખેટં ધનુશ્ચક્રકમ્ ।
પાશં કુક્કુટમઙ્કુશં ચ વરદં દોર્ભિર્દધાનં સદા

ધ્યાયામીપ્સિત સિદ્ધિદં શિવસુતં શ્રીદ્વાદશાક્ષં ગુહમ્ ॥

અથ લમિત્યાદિ પઞ્ચપૂજા ।
લં પૃથિવ્યાત્મને ગન્ધં કલ્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ કલ્પયામિ ।
યં વાય્વાત્મને ધૂપં કલ્પયામિ ।
રં અગ્ન્યાત્મને દીપં કલ્પયામિ ।
વં અમૃતાત્મને અમૃતં મહાનૈવેદ્યં કલ્પયામિ ।
સં સર્વાત્મને તામ્બૂલાદિ સર્વોપચારપૂજાન્ કલ્પયામિ ॥

સત્યલોકે સદાનન્દે મુનિભિઃ પરિવેષ્ટિતમ્ ।
પપ્રચ્છુર્મુનયઃ સર્વે બ્રહ્માણં જગતાં ગુરુમ્ ॥ ૧॥

ભગવન્સર્વલોકેશ સર્વજ્ઞ કમલાસન ।
સદાનન્દ જ્ઞાનમૂર્તે સર્વભૂતહિતે રત ॥ ૨॥

બહુધા પ્રોક્તમેતસ્ય ગુહસ્ય ચરિતં મહત્ ।
હૃદયં શ્રોતુમિચ્છામઃ તસ્યૈવ ક્રૌઞ્ચભેદિનઃ ॥ ૩॥

બ્રહ્મોવાચ-
શ ૃણ્વાન્તુ મુનયઃ સર્વે ગુહ્યાદ્ગુહ્યતરં મહત્ ।
સુબ્રહ્મણ્યસ્ય હૃદયં સર્વભૂતહિતોદયમ્ ॥ ૪॥

સર્વાર્થસિદ્ધિદં પુણ્યં સર્વકાર્યૈક સાધનમ્ ।
ધર્માર્થકામદં ગુહ્યં ધનધાન્યપ્રવર્ધનમ્ ॥ ૫॥

રહસ્યમેતદ્દેવાનાં અદેયં યસ્ય કસ્યચિત્ ।
સર્વમિત્રકરં ગોપ્યં તેજોબલસમન્વિતમ્ ॥ ૬॥

પ્રવક્ષ્યામિ હિતાર્થં વઃ પરિતુષ્ટેન ચેતસા ।
હૃત્પદ્મકર્ણિકામધ્યે ધ્યાયેત્સર્વમનોહરમ્ ॥ ૭॥

સુવર્ણમણ્ટપન્દિવ્યં રત્નતોરણરાજિતમ્ ।
રત્નસ્તમ્ભ સહસ્રૈશ્ચ શોભિતં પરમાત્ભુતમ્ ॥ ૮॥

પરમાનન્દનિલયં ભાસ્વત્સૂર્યસમપ્રભમ્ ।
દેવદાનવગન્ધર્વગરુડૈર્યક્ષકિન્નરૈઃ । ॥ ૯॥

સેવાર્થમાગતૈસ્સિદ્ધૈઃ સાધ્યૈરધ્યુષિતં સદા ।

મહાયોગીન્દ્ર સંસેવ્યં મન્દારતરુમણ્ડિતમ્ ॥ ૧૦॥

માણિક્ય વિદ્રુમૈશ્ચૈવ મહા શ્રીભિરુઞ્ચિતમ્ ।
તન્મધ્યેઽનન્તરત્નશ્રી જટામકુટ શોભિતમ્ ॥ ૧૧॥

રત્નસિંહાસનં દિવ્યં રવિકોટિસમપ્રભમ્ ।
સર્વાશ્ચર્યામયં પુણ્યં સર્વરત્ન પરિષ્કૃતમ્ ॥ ૧૨॥

તન્મધ્યેષ્ટદલમ્પદ્મં ઉદ્યત્સૂર્યા પ્રભોદરમ્ ।
નિગામાગમરોલમ્બં લમ્બકં ચિત્સ્વરૂપિણિમ્ ॥ ૧૩॥

વિદ્યા જ્યોતિર્મયં દિવ્યં દેવતાભિર્નમસ્કૃતમ્ ।
દેદીપ્યમાના રુચિભિર્વિશાખં સુમનોહરમ્ ॥ ૧૪॥

તન્મધ્યે સર્વલોકેશં ધ્યાયેત્સર્વાઙ્ગસુન્દરમ્ ।
અનન્તાદિત્યસઙ્કાશ માશ્રિતાભીષ્ટદાયકમ્ ॥ ૧૫॥

અચિન્ત્યજ્ઞાનવિજ્ઞાનતેજોબલસમાર્જિતમ્ ।
સર્વાયુધ ધરં વીરં સર્વાશ્ચર્યામયં ગુહમ્ ॥ ૧૬॥

મહર્હ રત્નખચિતં ષટ્કિરીટવિરાજિતમ્ ।
શશાઙ્ગાર્ધ કલારમ્ય સમુદ્યન્મૌલિભૂષણમ્ ॥ ૧૭॥

સમ્પૂર્ણ ચન્દ્રસાહસ્ર સમુદ્યદ્વદનોજ્વલમ્ ।
વિશાલ ફાલ લલિતં વિલોલાલક ભૂષણમ્ ॥ ૧૮॥

મદનોજ્વલ કોદણ્ડ મઙ્ગલ ભ્રૂ વિરાજિતમ્ ।
વિસ્તીર્ણરૂપતેજસં વિલસદ્દ્વાદશેક્ષણમ્ ॥ ૧૯॥

ચારુશ્રીવર્ણ સમ્પૂર્ણ કર્ણશોભાભિભાસુરમ્ ।
મણિ પ્રભા મયૂર શ્રી સ્ફુરન્મકરકુણ્ડલમ્ ॥ ૨૦॥

લસત્ દર્પણ દર્પઘ્ન ગણ્ડસ્થલ વિરાજિતમ્ ।
નવ્યકાઞ્ચન પુષ્પશ્રી નાસા પુટવિરાજિતમ્ ॥ ૨૧॥

મન્દહાસ પ્રભાજાલ મધુરાધર શોભિતમ્ ।
સર્વલક્ષણ લક્ષ્મીશ કમ્બુસુન્દર કન્ધરમ્ ॥ ૨૨॥

મહનીય મહારત્ન દિવ્યહાર વિરાજિતમ્ ।
ઉદગ્રનાગ કેયૂર સન્નદ્ધશુભકુણ્ડલમ્ ॥ ૨૩॥

રત્નકઙ્કણ સંશોભિ કરાગ્ર શ્રીમહોજ્વલમ્ ।
મહામાણિક્ય પર્યઙ્ક વક્ષસ્થલ વિરાજિતમ્ ॥ ૨૪॥

સમસ્ત જગદાધારં સ્વર્ણવર્ણશુભોદરમ્ ।
અતિગામ્ભીર્ય સમ્ભાવ્ય નાભીનવ સરોરુહમ્ ॥ ૨૫॥

રત્નશૃઙ્ખલિકા બન્ધલસન્મધ્યપ્રદેશિકમ્ ।
કનત્ કનક સંવીત પીતામ્બરસમાવૃતમ્ ॥ ૨૬॥

શૃઙ્ગારરસ સમ્પૂર્ણ રત્નસ્તમ્ભોપમોરુકમ્ ।
રત્નમઞ્જીર સન્નદ્ધ મણિદીપ પદામ્બુજમ્ ॥ ૨૭॥

ભક્તાભીષ્ટપ્રદં દેવં બ્રહ્મવિષ્ણ્વાદિસંસ્તુતમ્ ।
કટકાક્ષવીક્ષણૈઃ સ્નિગ્ધસ્તોષયન્તઞ્જગત્પતિમ્ ॥ ૨૮॥

સદાનન્દં જ્ઞાનમૂર્તિં સર્વલોકપ્રિયઙ્કરમ્ ।
શઙ્કરં સાત્મજં દેવં ધ્યાયેત્ શરવણોત્ભવમ્ ॥ ૨૯॥

અનતાદિવ્યચન્દ્રાગ્નિ તેજસમ્પૂર્ણવિગ્રહમ્ ।
સર્વલોકવનરતં સર્વતત્વાદ્ય તત્ત્વગમ્ ॥ ૩૦॥

સર્વેશ્વરં સર્વવિભું સર્વભૂતહિતેરતમ્ ।
એવઞ્જપિત્વા હૃદયં ષણ્મુખસ્યમહાત્મનઃ ॥ ૩૧॥

સર્વાન્ કામાનવાપ્નોતિ સમ્યજ્ઞાનઞ્ચવિન્દતિ ।
શુચૌ દેવશે સમાસીનઃ શુદ્ધાત્મા ચ કૃતાહ્નિકઃ ॥ ૩૨॥

પ્રાઙ્મુખૌ યતચિત્તશ્ચ જપેદ્-હૃદયમુત્તમમ્ ।
સકૃદેતતન્મનન્જપ્ત્વા સમ્પ્રાપ્નોત્યખિલં શુભમ્ ॥ ૩૩॥

સર્વાઘહરણં મૃત્યુદારિદ્રસ્યચનાશનમ્ ।
સર્વ સમ્પત્કરમ્પુણ્યં સર્વરોગ નિવારણમ્ ॥ ૩૪॥

સર્વ શર્મ કરં દિવ્યં સર્વાભીષ્ટાર્થદાયકમ્ ।
સર્વકામપ્રદં ગુહ્યં અપવર્ગૈક કારણમ્ ॥ ૩૫॥

પ્રજાકરં રાજ્યકરં ભાગ્યદં બહુપુણ્યદમ્ ।
ગુહ્યાત્ ગુહ્યતરં ભૂયો દેવાનામપિ દુર્લભા ॥ ૩૬॥

ઇદન્તુનાતપસ્કાય નાભક્તાય કદાચન ।
નચા શૂશ્રૂષવેદેયં મદાન્ધાયનકર્હિચિત્ ॥ ૩૭॥

સચ્છિષ્યાય સુશીલાય સ્કન્દભક્તિરતાયચ ।
સર્વદાભિરતાયેદં દાતવ્યં જયવર્ધનમ્ ॥ ૩૮॥

॥ ઇતિ શ્રી સુબ્રહ્મણ્યહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

---

Encoded and proofread by antaratma at Safe-mail.net

---

*shrI subrahmaNyahRidaya stotraM*

pdf was typeset on February 11, 2025

Please send corrections to *sanskrit@cheerful.com*